# Bhāgya Sūktam

[Ekāgni Kāṇḍam 1-15 & 2-6 – KYV TB 2-8-9-7 – RV S 7-41 – AV S 3-16]

ॐ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रम्हणस्पतिं प्रातस्सोममुत रुद्रꣳ हुवेम ॥ १ ॥

ॐ prātarag’nim’ prātarin’dragm’ havāmahēp’
prātar’mit’rāvaruṇāp’ prātaraśh’vināā ।
prātar’bhagam’ pūṣhaṇam’ bram’haṇas’patim’
prātas’sōmamuta rud’ragm’ huvēma ॥ 1 ॥

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥

prātar’jitam’ bhagamug’ragm’ huvēma vayam’
put’ramaditēr’yō vidhar’tā ।
ādh’raśh’chid’yam’ man’yamānas’turaśh’chid’rājā
chid’yam’ bhagam’ bhak’ṣhīt’yāha ॥ 2 ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदव ददन्नः ।
भग प्रणो जनय गोभिरश्वैर्भग प्रनृभिर्नृवन्तस्स्याम ॥ ३ ॥

bhagap’ praṇētar’bhaga sat’yarādhō bhagēmān’
dhiyamudava dadan’naḥa ।
bhagap’ praṇō janaya gōbhiraśh’vair’bhagap’
pranṛbhir’nṛvan’tas’syāma ॥ 3 ॥

www.SaiVeda.net

उतेदानीं भगवन्तस्स्यामोत प्रपित्व , उत मध्ये , अन्हाम् ।
उतोदिता मघवन्थ्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥४॥

utēdānīm’ bhagavan’tas’syāmōtap’ prapit’va ,
uta madh’yē , an’hāam ।
utōditā maghavanth’sūr’yas’ya vayan’
dēvānāgm’ sumataus’ syāma ॥ 4 ॥

भग , एव भगवाꣳ , अस्तु देवास्तेन वयं भगवन्तस्स्याम ।
तं त्वा भग सर्व , इज्जोहवीमि स नो भग पुर , एता भवेह ॥५॥

bhaga , ēva bhagavāgm’ , as’tu dēvās’tēna vayam’
bhagavan’tas’syāma ।
tan’ tvā bhaga sar’va , ij’jōhavīmi sa nō bhaga pura ,
ētā bhavēha ॥ 5 ॥

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन , आवहन्तु ॥६॥

samadh’varāyōṣhasō naman’ta dadhik’rāvēva
śhuchayē padāya ।
ar’vāchīnaṁ’ vasuvidam’ bhagan’ nō
rathamivāśh’vā vājina , āvahan’tu ॥ 6 ॥

www.saiveda.net

अश्वावतीर्गोमतीर्न , उषासो वीरवतीस्सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः ॥७॥

aśh'vāvatīr'gōmatīr'na , uṣhāsō
vīravatīs'sadamut'chhan'tu bhad'rā-ḥa |
ghṛtan' duhānā viśh'vata[fp]' prapīnā yūyam' pātas'
svas'tibhis'sadā naḥa || 7 ||

यो मांऽग्ने भागिनꣳ सन्तमथाभागं चिकी-ऋषति ।
अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा ॥८॥

yō māā (a)g'nē bhāginagm'
san'tamathābhāgañ' chikī , ṛṣhati |
abhāgamag'nē taṅ' kuru māmag'nē
bhāginaṅ' kurus' svāhāā || 8 ||

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

www Sai Veda net